हन जनादिति डः टेर्लोपोडितीति टेर्लोपः विबुधेति विबुध्यन्ते इति विपूर्व्व बुधधातोरिगुपधज्ञाप्रीकिरः क इति कः विबुधसख इति सख्यशिश्वीति छः ष इति षः यचि भमिति इकारलोपः परन्तप इति तृभृवृजिधारितपिदमिसहां संज्ञायामित्यत्र चकाराध्याहारादसंज्ञायामपि खः नाम्न्येवेदं सूत्रमिति चेत् कृत्तद्धितसमासानामभिधानं नियामकमित्युक्तेरसंज्ञायां खः खित्यनव्ययस्य इति मन् दशरथ इति शब्देनोक्तत्वात् त्यर्थे वा त्यर्थसम्बुद्धेः कार्य इति प्रीद शरथो नृपोऽभूत् कीदृशः इत्युदाहृतः वक्ष्यमाणश्लोकैरुदाहरणतां प्राप्त इति केचित् गुणैरिति गुण्यन्ते अभ्यस्यन्ते इति गुणा गुणत्कमन्त्रे इत्यस्मात् घञलनडिति अल् ञेर्लोपोऽनाविति ञेर्लोपः हस्यालोपोऽशितीत्यकारलोपः वरमिति वृञ धातोः व्रियते योऽसाविति पूर्व्वेणाल् ण्यर्थेऽङ इति णः सनातन इति नित्यार्थात् सनाशब्दात् त्यचाद्यचिरेत्यादिनाष्टनः सनातनः शाश्वतकंसवैरिणोः शिवेऽपि चात्मन्यतिथौ मुनिश्चय इति विश्वः। उपागमदिति आगम्लृ गत्यां ऌदित्वात् शासलिद्युदितिङः हनगमेत्यादावङ इत्युक्तेर्नोङलोपः। दशरथगुणानाह ॥१॥

सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट पितॄनताप्सीत्समर्मस्त बंधून्। व्यजेष्ट षड्वर्गमरंस्त नीतौ समूलघातं न्यवधीदरींश्च ॥२॥

ज॰ म॰ सोऽध्यैष्टेत्यादि॥ क्षत्रियस्य धर्मोऽध्ययनं यजनं दानं शस्त्राजीवो भूतरक्षणं चेति उभयं नृपइत्यनेनोक्तं। भूतरक्षणे शस्त्रमङ्गं

ताभ्यां चावयोः परिचारिकेति पिण्डभागद्वयं दत्तं सुमित्रा प्राशितवती। ततस्र पुत्रद्वयं जनयिष्यति एवञ्चाभिसन्धाय चतुर इत्युक्तं नतु त्रीनिति। षूङ् प्राणिगर्भविमोचने स्वरतीत्यादिना विभाषितेट्॥ १३॥

निष्ठामित्यादि॥ कर्म्मणि निष्ठां निष्पत्तिं गते सति उदारवंश्यास्तिस्रो राजपत्न्यः चतुरः शोभनपुत्रान् प्रसोतुं कृतशेषं प्राशुः। अश भोजने षूङ्ल प्रसवे तादर्थ्ये चतुम् वेमूदिदिति इम् पत्रे इमो ऽभावः। वंश्या इति ढघेकादिति भवार्थे ष्यः तस्यानित्त्वान्नत्रिर्न ईप्। कर्म्मणि कीदृशे दानेन जातः सभ्यानां तोषो यत्र। डुदाञ्दानदाने द्वितस्त्वे इति त्रिमक् दद्दोध इति दत्। सभायां साधुः सभ्यः पूर्व्ववत् ष्यः। विहितत्रिमे विधानेन जाते पूर्व्ववत् त्रिमक् धाञोहिरिति हिः॥ १३॥ भ०

कौशल्ययासावि सुखेन रामः प्राक्केकयीतो भरतस्ततोऽभूत्। प्रासोष्ट शत्रुघ्नमुदारचेष्टमेका सुमित्रा सह लक्ष्मणेन॥ १४॥

कौशल्यया॥ कोशलस्य राज्ञो ऽपत्यमिति वृद्धेत्कोशलाजादाञ्ञ्यङ्। यङश्चाप् कौशल्यया प्राक् प्रथमं असावि रामः जन्यतेस्म। षूङः कर्म्मणि लुङि चिणिरूपम् सुखेनेति प्रकृत्यादित्वात्तृतीया। सहतां जन्मनि न काचिदपि पीडास्ति। तदनन्तरं जं०म०

प्रस्थास्यमानावित्यादि। प्रस्थास्यमानौ गमिष्यन्तौ तौ रामल भ०
क्ष्मणौ उपसेदुषः उपसन्नान् जनानिदं वक्ष्यमाणं ऊचतुः। किम्भू
तान् शोशुच्यमान् पुनःपुनरतिशयेन शोचतः सूचसूत्रेत्यादिना
यङ् खेर्नुः प्रस्थास्यमानाविति प्रतिज्ञानिर्णयेत्यादिना संपूर्व्वात्
तिष्ठतेर्म्मे स्यमानः। उपसेदुष इति उपपूर्व्वात् सदेश्छीपमवदिति क
सुः वसोर्घसे इतीम् तृफलेति अतएत्वं खिलोपश्च वसोर्व्वःसेमपी
ति उः किमूचतुरित्याह इहाभ्युदये वृद्धौ सत्यां किमस्मान् यूयं
शोचत विधिनिमन्त्रणेत्यत्रादिशब्दात् विधावपूर्व्वप्रकाशने गौ व
र्त्तेति खेदानुकम्पासन्तोषविस्मयामन्त्रितेष्वपीति वर्त्तमानः अभ्युद
यः कुत इत्याह पितुर्नियोगलाभेन वनगमनाज्ञालाभेन कृता
र्थान् लब्धप्रयोजनान् अस्मानिति इयोरप्यस्मदोवऊलमिति परः
स्मैपदे वाह्याध्यात्मिकभाववऊलविवक्षया सीतान्वितत्वाद्वा ॥१२॥

असृष्ट योयस्य भयेष्वरक्षीयः सर्व्वदास्मानपुषत्स्वपो
षं। महोपकारस्य किमस्ति तस्य तुच्छेन यानेन वन
स्य मोक्षः ॥१३॥

असृष्ट यः। असृष्ट जनितवान् सृजेर्द्दैवादिकस्यात्मनेपदित्वात् ज०स०
लुङि रूपम् न तौदादिकस्य परस्मैपदित्वात् सृजिदृशोरित्यम्
यस्य भयेषु सत्सु अरक्षीत् पालितवान् रक्षपालन इत्यस्य लुङि
रूपम् यः सर्व्वदा सर्व्वकालं सर्व्वैकान्येत्यादिना दाप्रत्ययः य
श्चापुषत् स्वपोषन्धनेनापुषत् पुष्टवान् पुषेर्लङि रूपम् पुषादित्वा
देवाङ् स्वेपुष इति णमुल् अमैवाव्ययेनेति समासः यथाविध्यनु

याणि ययोः वल्कलवाससावित्यर्थः अनुप्तिमाणि फलानि अश्न नमाहारो ययोः तौ वन्यफलाहारौ न शालिभोजनौ परिव्रि यतेऽनेनेति घञ् उपसर्गस्य घञीति दीर्घः मृगाणाममनुष्य त्वात् अभृत्रिमः परीवारो अनुजीविलोको ययोस्तौ मृगपरि वारौ तथापि माम्पर्य्यभूताम्परिभूतवन्तौ लुङि रूपम् ॥ २७ ॥

भ॰ असंस्कृत्रिमसंव्यानावित्यादि । तौ असंस्कृत्रिमसंव्यानौ तन्त्वा दीनां संस्कारेण जातं संस्कृत्रिमं संपरेःसुमिति सुम् न विद्यते संस्कृ त्रिमं संव्यानमुत्तरीयं ययोर्वल्कलमात्रसत्त्वात् वपनेन जातं उप्तिममनुप्तिमं वन्यं तादृशं फलमशनमाहारो ययोः अथवा नन्द्यादित्वात् कर्त्तरि अनः फलाशिनाविति क्वचित् पाठः भरणे न पोषणेन जातोभृत्रिमः परीवारोऽनुजीविजनो ययोः सर्व्वत्र ड्वितस्त्रिरिति त्रिमक् ग्रहवृपाद्योरिति जिः परिवृणोतीति कर्त्तरि घञ् व्यतीहारे त्रिःपूर्व्व इत्यत्र व्यतीहार इति दीर्घनिर्द्देशात् क्वचित् घञन्ते उपसर्गस्य दीर्घत्वं सूचितं तेनात्र परेरिकारस्य दीर्घत्वं तौ यद्यपि ईदृशौ तथापि मां पर्य्यभूतां परिभूतवन्तौ भूस्येति सेर्लुक् ॥ २७ ॥

स्वःश्रेयसमवाप्तासि भ्रातृभ्यां प्रत्यभाणि सा। प्राणि वस्तव मानार्थं व्रजाश्वसिहि मा रुदः ॥ २८ ॥

ज॰म॰ स्वःश्रे । स्वःशब्दः प्रशंसामाह शोभनं श्रेयइति वाक्ये श्वसो वसीयः श्रेयसइत्यत्र मयूरव्यंसकादित्वात्सः स्वःश्रेयसङ्कल्याणम वाप्तासि प्राप्स्यसि भविष्यदनद्यतने लुट् मारयावस्तावित्युक्तभव ति ताभ्यां भ्रातृभ्याम्प्रत्यभाणि प्रतिभणिता सा कर्म्मणि लुङ् प्राणि

त्वा गजविक्रमो हस्तिपराक्रमो हस्तिगमनतुल्यगमनोवा रामो मृगस्यानुपदी सन् जगाम फलपुष्पादेरलब्धस्य साधनं योगः शरीरादेर्लब्धस्य पालनं क्षेमः तौ करोतीति सुकृष्टः अनुपदं यातीति वाहुल्यात् इन् अनुपदमनुगमनं विद्यतेऽस्येति नैका जादिति इन् अन्वेष्टर्य्यनुपदादिनिति परसूत्रं ॥ ५० ॥

**स्थायं स्थायं क्वचिद्यान्तं क्रान्त्वा क्रान्त्वा स्थितं क्वचित्।**
**वीक्षमाणोमृगं रामश्चित्रवृत्तिं विसिस्मिये॥५१॥**

स्थायम्। मृगश्चित्रवृत्तिमद्भुतशरीरचेष्टं वीक्षमाणोरामो विसिस्मिये विस्मितः स्मिङोङित्त्वादात्मनेपदं षोपदेशत्वाच्चाभ्यासे णः परस्य सस्य षः चित्रवृत्तितां दर्शयन्नाह स्थायं स्थायं स्थित्वा स्थित्वा क्वचित्प्रदेशे यान्तं क्रान्त्वा क्रान्त्वा क्वचित्प्रदेशे उत्प्लुत्योत्प्लुत्य स्थितम् आभीक्ष्ण्ये णमुति क्त्वाच्लेणमुलौ द्विर्व्वचनञ्च ॥ ५१ ॥ ज॰म॰

स्थायमित्यादि। मृगं वीक्षमाणो रामोविसिस्मिये विस्मितः भ॰ स्मिङष्ठ्यां रूपं षोपदेशत्वात् खेरित्वात् षत्वं स्तुध्वोरितीयः विस्मये हेतुमाह चित्रवृत्तिं आश्चर्य्यचेष्टं चित्रवृत्तित्वं दर्शयति स्थित्वा स्थित्वा क्वचित् गच्छन्तं चणम्वाभीक्ष्णेपूर्व्वकाले इति चणम् आभीक्ष्णे द्वित्वं लोकतः सिद्धमिति स्मारं स्मारं नमसीत्युदाहरणेन ज्ञापितं क्वचित् क्रान्त्वा क्रान्त्वा उत्प्लुत्य उत्प्लुत्य स्थितं क्रमोर्घौ वेति पक्षे दीर्घः ॥ ५१ ॥

तव कान्तिं विलोक्य न अभिमनायेत प्रीतमनान भवेत् अपि तु सर्व्वएवाभिमनायेत भृशादेस्वयर्थे वेति पाचिकोक्यः सलोपश्च घीं ऽज्य्यरे प्रौढ्यासम्भावने इति खौ॥ ७३॥

दुःखायते जनः सर्व्वः सएवैकः सुखायते। यस्यो त्सुकायमाना त्वं न प्रतीपायसेऽन्तिके॥ ७४॥

दुःखा॥ सएवैकोजनः सुखायते सुखं वेदयते यस्यान्तिके समीपे न त्वम्प्रतीपायसे न प्रतिकूलवर्त्तिनी भवसि उत्सुकायमा मा उत्कायमाना सती यस्य पुनरन्तिके उत्सुकायमाना प्रतीपा यसे ससर्व्वोजनः दुःखायते दुःखं वेदयते सुखदुःखशब्दाभ्यां सुखादिभ्यः कर्त्तृवेदनायामिति क्यङ् उत्सुकप्रतीपशब्दाभ्याम्भृ शादित्वात्॥ ७४॥ ज॰म॰

दुःखेत्यादि। यस्यान्तिके समीपे त्वं उत्सुकायमाना उत्सु कीभवन्ती न प्रतीपायसे न प्रतिकूलीभवसि सएवैकोजनो जग ति सुखायते सुखमनुभवति अन्यः सर्व्वोजनोदुःखायते दुःखमनु भवति सुखदुःखशब्दाभ्यां शब्दसुखकष्टादेरिति वेदे क्यः केचित्तु सुखदुःखयोस्तदाश्रयेऽपि वर्त्तमानत्वात् असुखःसुखीभवति अदुः खोदुःखीभवति इत्यर्थे डाच् लोहितादेःपश्चेति क्यमाङः उत्सु कप्रतीपाभ्यां भृशादित्वात् च्व्यर्थे क्यः केचित्तु प्रतीपशब्दात् घान्क्यक्रीत्यादिना आचारे क्यमाङः॥ ७४॥ भ॰

चुर्णने छुब्धकचूर्णत्वात् पिषोणम् गतार्थत्वे तदनुप्रयोगस्येति
परः स्वमते चणम्वित्यस्य योगविभागात् चैश्चुष्यचोमकवदिति
छुषेः कस्य कः स्वतेजसा अखिन्दानः दैन्यमभजन् अपरिश्रा
म्यन् वा खिदङ्‌श्चौदैन्यके नणोन्तेऽणौ ॥ ३७ ॥

भतिं तृणद्मि यचाणां हिनस्मीन्द्रस्य विक्रमं। भन
ज्मि सर्व्वमर्य्यादास्तनच्मि व्योम विस्तृतं॥ ३८ ॥

भूतिमित्यादि। यचाणां भूतिं सम्पदं तृणद्मि उत्पादयामि उतृ ज०म०
दिरहिंसानादरयोः इन्द्रस्य विक्रमं हिनस्मि अपनयामि हिंसि
हिंसायां इदितानुम् तस्य श्नान्नलोपः सर्व्वमर्य्यादाश्च व्यवस्थाः
सर्व्वेषां भनज्मि मर्द्दयामि भञ्जोआमर्द्दने श्नान्नलोपः तनच्मि
व्योम विस्तृतं संकोचयामि तृञ्चआच्छादने कान्तेन चौरादिकस्य
रूपं तञ्चूसङ्कोचे श्नान्नलोपः कस्मादेवं प्रवृत्तस्त्वमिति चेदाह
॥ ३८ ॥

भूतिमित्यादि। यचाणां भूतिं सम्पदं तृणेह्मि नाशयामि भ०
तृहञ् धिर्नादरे च चकाराद्धिंसायां इन्द्रस्य विक्रमं हिनस्मि अ
पनयामि हिसधिकिहिंसे नणोनलोपश्चेति इदित्वात् कृतनुणो
लोपः सर्व्वेषां मर्य्यादाव्यवस्थाभनज्मि निवर्त्तयामि भन्जोधौ
मोटने व्योमन्आकाशस्य विस्तृतं विस्तारं तनच्मि सङ्कोचयामि
तञ्चुधसंकुचि तनज्मीति पाठे तन्जुधसङ्कोचे स्तृनञ्स्तृतावित्य
स्माद्भावे क्तः व्योमविशेषणे विस्तृतमिति निरर्थकं स्यात् ॥ ३८॥

न तृणेह्मीति लोकोऽयं मां विन्ते निष्पराक्रमं। एवं
वदन् दाशरथिरपृणग्धनुषा शरं॥ ३९ ॥

समाविष्टमित्यादि। वनान्तान् वनपर्य्यन्तान् स्मरस्य कामस्य ज॰म॰
गृहमिव उन्मादकत्वात् गेहेकइति ग्रहेःकः अर्द्धर्चादिपाठात्
पुंलिंगता स्थितस्येत्यर्थात् योज्यं अन्यथा कथं समानकर्तृकत्वं
मानसस्येतः ज्योतिषिग्रहः ग्राहेणेवात्तमर्णवे अर्णः यानीयं
यत्रास्तीति केशाद्वोऽन्यतरस्यामिति तत्रार्णसोलोपश्चेति भूमनि
न्दाप्रशंसास्वित्यादौ वः सलोपश्चेति अर्णवे समुद्रे वर्त्तमानेन
ग्राहेण कुंभीरादिना आत्तं गृहीतं आङ्पूर्व्वस्य दाञोऽचउप
सर्गात्तः॥ ८३॥

समेत्यादि। वनान्तान् वनस्वरूपान् तत्समीपदेशान् वा दृष्ट्वा भ॰
स्थितस्य मम मानसं ग्रहेण सूर्य्यादिना समाविष्टमिव आसादित
तमिव इत्यर्थः उपहितत्वात् समुद्रे ग्राहेण कुम्भीरादिना आत्तं
गृहीतमिव अतिगभीरशोकमग्नत्वेऽपि कामपीडितत्वात् स्थित
स्येत्यध्याहारेणैककर्तृकत्वे पूर्व्वकाले क्त्वाच् वनान्तान् कीदृशान्
स्मरस्य गृहानिव ग्रहैः सूर्य्यादौ अन् जलजन्तौ घञ् निलयेऽलि
जिस्याभिधानात् गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाइत्य
मरः आङ्पूर्व्वदाञः क्ते ग्यचस्तवेति पचे तादेशः अर्णोजलं विद्यते
अस्येति केशादित्वात् वः मनीषादित्वात् सलोपः मनएव मानसं
स्वार्थे ष्णः केचित्तु मनएव जानातीति व्यवहारात् मनसएव
दर्शनकर्तृत्वं विवक्षितमित्युक्त्वा स्थितस्येति नाध्याहरन्ति अन्तः
प्रान्तेऽन्तिके नाशे स्वरूपेऽपि मनोहरइति विश्वः॥ ८३॥

वाताहतिचलच्छाखा नर्त्तकाइव शाखिनः। दुः
सहाह्वी परिक्षिप्ताः क्वणद्भिरलिगायकैः॥ ८४॥

भ॰ जटेत्यादि। जटायुः पची पुण्यकृत् पुण्यं कृतवान् त्वासुषिति क्विप् स्वस्यतन् कीदृशः दण्डकारण्यं सञ्चरः स्थानं यस्य सतथा सञ्चरत्यस्मिन्नित्याधारेऽल् योराघवकार्य्यं सीताहरणविज्ञापनादिकं कृत्वा अग्निना संस्कृतः कृतसंस्कारः सन् स्वः स्वर्गमारूढः गत्यर्थाढेत्यादिना रुहेः कर्त्तरि क्तः होढः ढभादिति धः ष्टुभिरिति ढः ढ्लोर्ढ्लीति ढलुक् दीर्घश्च ॥ ८१ ॥

नरकस्यावतारोऽयं प्रत्यचोऽस्माकमागतः। अचेष्टायदिहान्यायादनेनात्स्यामहे वयं॥ ८२ ॥

ज॰म॰ नरेत्यादि। अवतीर्य्यते येन कर्म्मणेति अवेस्तृस्त्रोर्घञ् सएवायं नरकस्यावतारः प्रत्यचोऽस्माकमागतः यद्यस्माद्वयमचेष्टाः निश्चलाः अनेन पचिणा अन्यायादयुक्त्या नीयते अनेनेनि निपूर्व्वादिणः अध्यायन्यायेति निपातनात् घञ् अत्स्यामहे भचयिष्यामहे कर्म्मणि ल्टट्॥ ८२ ॥

भ॰ नरेत्यादि। नरकमवतरति येनाधर्म्मेण सएव प्रत्यचइन्द्रियग्राह्योऽयं पचिरूपोऽस्माकमागतः रूपकालङ्कारोवा पचिविशेषणं वा अवपूर्व्वात्तरतेः करणे घञ् नरकस्येति कर्म्मणि षष्ठी यद्यस्मात् इह प्रदेशे अनेन पचिणा अन्यायादनौचित्याद्युक्त्या वा वयमत्स्यामहे भचणीयाः यतोऽचेष्टाश्चेष्टारहिताः नीयतेऽनेनेति न्यायः निपूर्व्वादिणः करणे घञ् अदःकर्म्मणि तो ॥ ८२ ॥

नाद्वन्दीभ्यइत्यर्थः पुष्पफलं शोभनं सम्प्रायच्छन्त ददति स्म दान स्वसाचेच्चतुर्थ्यर्थइति तङ् पुष्पफलमिति जातेरेकवद्भावः॥ ३२॥

भ० यानैरित्यादि। अन्ये कुञ्जरादिभिर्यानैः समचरन्त सञ्चरन्ते स्म समस्त्वेति मं अन्ये शुभं शोभनं पुष्पं फलञ्च वन्दीभिः हठहृतस्त्रीभिः संप्रायच्छन्त संप्रददुः सन्दानोभेऽधर्मेनित्यमिति संप्रदाने तृतीया वन्दीभिः सह विहरणेच्छया ताभ्योददुरित्यधर्म्मः दानःसाचेच्चर्थे इति मं सेत्यनेन समस्त्वेत्यस्मात् चौ आक्षयते॥ ३२॥

कोपात्काश्चित्प्रियैः प्रत्तमुपायंसत नासवं। प्रेमजिज्ञासमानाभ्यस्ताभ्योऽशप्सत कामिनः॥ ३३॥

ज०म० कोपादित्यादि। काश्चित् स्त्रियः कोपात् अन्यस्त्रीगमनजनितात् आसवं मद्यविशेषं नोपायंसत न स्वीकृतवत्यः विभाषोपयमइत्यकित्त्वपक्षे रूपं उपाद्यमः स्वीकरणइति तङ् पाणिग्रहणपूर्व्वस्य स्वीकरणस्य तत्र स्थितत्वादौपचारिकमत्र स्वीकरणं द्रष्टव्यं समुदाङ्भ्योयमोग्रन्थइति वा तङ् उदाङ्पूर्व्वस्य यमआदानार्थत्वात् अवसरप्राप्तन्तु ह्यत्रद्वयमुदाहृतं स्यात् प्रियैः प्रत्तन्दत्तं अचउपसर्गात्तः प्रेम जिज्ञासमानाभ्यः किमस्मासु प्रेमास्ति वा न वेति कृतकोपप्रकाशेन ज्ञातुमिच्छन्तीभ्यः ज्ञाश्रुस्मृदृशांसनइति तङ् ताभ्यायोषिद्भ्यः कामिनः अशप्सत न मे त्वदन्या प्रियास्तीति तदीयशरीरस्पर्शनेन शपथञ्चक्रुः शपाउपलम्भने इत्यात्मने

एणप्रकारेण द्रुभङ्गध्वनिसंविग्नाः शाखाभङ्गशब्देन सन्त्रस्ताः ओ विजीभयचलनयोः ओदितश्चेति निष्ठानत्वं नुवत्पक्षिकुलाः कूजद्भिः पक्षिकुलैः व्यस्तमानसाः नुशब्दे तौदादिकस्तस्य उवङादेशः ॥१॥

भ॰ द्रुभङ्गेत्यादि। सीतासन्निधिस्थाः चण्डाचर्य्यो राक्षसी रावणस्य निवेदनं वक्ष्यमाणं अकार्षुः कृतवत्यः कृञ्ष्टौ अनुस्त्रिदेरित्युम कीदृश्यः द्रूणां वृक्षाणां भङ्गशब्दैः संत्रस्ताः विजङोशोभीकम्पे ओदित्वात् क्तस्य नः कुवद्भिः शब्दायमानैः पक्षिणां कुलैः समूहैरा कुलाव्यस्तचित्ताः कुङशब्देकुलचेत्यादादिकात् शतृः कुशब्दे भौवादिकइति जयमङ्गलायां प्रमादस्तस्यात्मनेपदित्वात् शपो लुणित्वाच्च कूजत्पक्षिकुलाकुलाइति क्वचित् पाठः ॥१॥

**यदतासीच्छनैर्भानुर्यत्रावासीन्मितं मरुत्।**
**यदाप्यानं हिमांशुेण भनत्युपवनं कपिः॥२॥**

ज॰म॰ यदित्यादि। यदनं भानुः शनैर्मन्दमतासीत् तपति स्म हलन्तलक्षणा वृद्धिः मरुत् मितं स्तोकमवासीत् वाति स्म हिमांशुेण शिशिररश्मिना आप्यानं वृद्धिं नीतं प्यायतेर्लोपाव्योर्व्वलीति यलोपः ओदित्वान्नत्वं तदुपवनं कपिर्भिनत्ति चूर्णयतीति निवेदनमकार्षुः॥२॥

ज॰ यदित्यादि। निवेदनमाह यदुपवनं भानुः शनैर्मन्दंअतासीत् तपति स्म व्रजवदेति व्रिः अनिमत्वात् यत्रोपवने वायुर्मित

पुनर्वनं बभञ्ज कीदृशं पत्त्रिभिः पक्षिभिः क्षुधित्वा क्षुधितैर्भूत्वा अध्युषितं छलतिवासं वसतिक्षुधोरितीट्॥ ३९॥

भ० पवितइत्यादि। कपिः क्षुधित्वा क्षुधितोभूत्वा पयोनिधौ पूत्वा स्नात्वा फलादिकं भुक्ता चेत्यर्थात् शीतलैरनुगुणैर्व्वातैः पवितस्य क्तश्रमः सन् भूयः पुनरपि तद्वनं बभञ्ज भग्नवान् कीदृशं पत्त्रिभिः पक्षिभिरध्युषितं अधिष्ठितं क्षणं भङ्गाभावात् पूञः पूङ्क्षिशवमेतिक्त क्तवत्वोर्वेम् पूशीधृषेत्यादिना णुः पूङ्क्षिश्ड्दितइति क्त्वावेम् वसेः क्षुधेश्च क्षुधवसपूजार्थाश्च इतीम्॥ ३९॥

उच्चैरञ्चितलाङ्गूलः शिरोऽञ्चित्वेव संवहन्। दधद्विलुभितं वातैः केशरं वह्निपिङ्गलं॥ ४०॥

ज०म० उच्चैरित्यादि। उच्चैरूर्द्धं अञ्चितं पूजितं लाङ्गूलं पुच्छं यस्य शोभनविन्यासेन स्थितत्वात् शिरोऽञ्चित्वेव सम्वहन् अनम्रत्वात् पूजयित्वेव शिरोबिभ्राणः अञ्चेः पूजायामिति विभाषेट् वह्निपिङ्गलञ्च केशरं सटां दधत् विभ्रत् वातैर्विलुभितं आकुलितं लुभोविमोहनइतीट् विमोहनमाकुलीकरणं॥ ४०॥

भ० उच्चैरित्यादि। कपिः कीदृशः उच्चैरञ्चितलाङ्गूलः ऊर्द्धं अञ्चितं पूजितं लाङ्गूलं पुच्छं यस्य सतथा शिरोऽञ्चित्वेव अनम्रत्वात् पूजयित्वेव संवहन् बिभ्राणः वातैर्विलुभितं चञ्चलीकृतं वह्निवत्पिङ्गलं केशरं दधत् धारयन् ईदृशोवनं बभञ्जेति पूर्व्वेणान्वयः क्षुधवसपूजार्थाश्चागार्धार्थलुभइति इम् नेदित्पूजार्थाञ्चेरिति नलोपाभावः॥ ४०॥

बभ्राम इभ्रइर्भ्रमे अमुभ्यद्दर्त्तपःखेदयोरुदिलात् पूक्तिभ्रादित इति वेम् इतोऽपक्षिदि नृत्यनृत्ये अनयोर्नृत्कदिति वेम्॥ ४२॥

पारं जिगमिषन् सोऽथ पुनरावर्त्स्यतां द्विषां। मत्तद्विरदवद्रेमे वने लङ्कानिवासिनां॥ ४३॥

ज०म० पारमित्यादि। अथ सकपिर्द्विषां पारं जिगमिषन् गन्तुमिछन् गमेरिट्परस्मैपदेषु पुनरावर्त्स्यतां प्रतीपीभविष्यतां नवृद्भ्य इतीट्प्रतिषेधः वृद्भ्यःस्यसनोरिति परस्मैपदं लङ्कानिवासिनां वने मत्तद्विरदइव रेमे क्रीडितवान्॥ ४३॥

भ० पारमित्यादि। अथानन्तरं सहनूमान् पुनरावर्त्स्यतां प्रत्यागमिष्यतां लङ्कानिवासिनां द्विषां शत्रूणां पारमन्तं गन्तुं इच्छुः सन् वने मत्तहस्तीव रेमे क्रीडति स्म गमोऽमेसइति गच्छतेरिम् वृद्भ्योनेम्पेइति वृतेर्नेम् अतएव पं॥ ४३॥

यद्यकल्प्स्यदभिप्रायोयोद्धुं रक्षःपतेः स्वयं। तमप्यकर्त्स्यमद्याहं वदन्नित्यचरत्कपिः॥ ४४॥

ज०म० यद्येत्यादि। रक्षःपतेः रावणस्य स्वयं योद्धुं यद्यभिप्रायोऽकल्प्स्यत् समपत्स्यत् तासिचकपइति चकारात् स्यकारेच नेट् तदा तमप्यहमकर्त्स्यं उत्सारयामि अहमद्येति एव वदन् कपि

वैनमचरत् सेसीचीत्यादिना विभाषेट् अकल्प्स्यदकर्त्स्यमिति च लिङ्निमित्तइति ल्वङ् हेतुहेतुमद्भावस्य लिङोनिमित्तं॥४४॥

यद्येत्यादि। यदि रक्षःपतेरावणस्य स्वयं योद्धुमभिप्रायो ऽकल्प्स्यत् कल्पिष्यते तमप्यद्याहमकर्त्स्यं अछेत्स्यं इति वदन् कपि रचरत् चरति स्म क्रपूङ्गुचकल्पने पूर्व्ववत् वृतादित्वात् स्यस्य नेम् कृतीश्रपछिदि नृत्कृदिति वेम्॥४४॥ भ०

हते तस्मिन् प्रियं श्रुत्वा कल्प्ता प्रीतिं परां प्रभुः। तोषोऽद्यैव च सीतायाः परस्येतसि कल्प्स्यति॥४५॥

हतइत्यादि। हते तस्मिन् रक्षःपतौ प्रियं श्रुत्वा प्रभुः रामः परां प्रीतिं कल्प्ता जनयिता अन्तर्भावितोण्यर्थः धातोरकर्म्म कत्वात् सीतायास्त्वद्यैव चेतसि तोषः परोमहान् कल्प्स्यति संप त्स्यते तासिचक्लृपइतीट्प्रतिषेधः लुटि चक्लृपइति परस्मैपदं॥४५॥ ज०म०

हतेइत्यादि। तस्मिन् रावणे हते सति प्रियं श्रुत्वा प्रभूरामः परां प्रीतिं कल्प्ता प्राप्स्यति नेम्पेक्षा इति तेनैव पं किन्तु अद्यैव च अधुनैव च सीतायास्चेतसि परस्तोषः कल्प्स्यति भविष्यति पूर्व्ववत् वृतादित्वात् स्यस्य नेम् इति वदन् कपिरचरदिति पूर्व्वेणान्वयः ॥४४॥ भ

आहूय रावणोऽवोचदथेन्द्रजितमन्तिकात्। वने मत्तइव क्रुद्धोगजेन्द्रः प्रधनेष्वटन्॥४६॥

कामिणमिति पाठे तेनैव कवर्गवत्वात् नित्यं णत्वं कीदृशाः सावि ष्कारा: साहङ्काराः सुरापिणः सुरापैर्युक्ताः सुरां पिबन्तीति सुरापाः हनजगादिति डः ततोऽस्त्यर्थे इन् पूर्ववदेकाच्त्वात् नित्यं णत्वं ॥ ६६ ॥

संहर्षयोगिणः पादौ प्रणेमुस्त्रिदशद्विषः। प्रह्विण्व न्तोहनूमन्तं प्रमीणन्तं द्विषन्मतीः ॥ ९७ ॥

अ०म० संहेत्यादि। संहर्षयोगिणः स्पर्द्धायोगिनः कुमतिचेति णत्वं ते अन्योन्याभिभवेच्छया त्रिदशद्विषोरावणस्य पादौ प्रणेमुः उप सर्गादसमासेऽपीति णत्वं हनूमन्तं प्रह्विण्वन्तः ढौकयन्तः द्विष न्मतीः शत्रुबुद्धीः प्रमीणन्तं अभिभवन्तं मीञ्हिंसायां क्रैयादिकः हिनुमिनादिति णत्वं ॥ ६७ ॥

भ० समित्यादि। राक्षसास्त्रिदशद्विषोरावणस्य पादौ प्रणेमुः प्रणतवन्तः प्राग्वन्नोणइत्यादिना नादिधातुत्वात्णत्वं संहर्षयो गिणः महाहर्षयुक्ताः पुर्गइत्यादिना कवर्गवत्वात् नित्यं णत्वं हनूमन्तं प्रह्विण्वन्तः प्रापयन्तः कीदृशं द्विषन्मतीः शत्रुबुद्धीः प्रमी णन्तं अभिभवन्तं प्राग्वन्नोणइति मीनाहिन्वोर्णत्वं ॥ ६७ ॥

प्रवपाणि शरीरो भूमौ वानरस्य वनच्छिदः। आम न्त्रयत संक्रुद्धः समितिं रक्षसां पतिः ॥ ९८ ॥

अथेत्यादि। मुदा हर्षेण यदुषितं हास्यं प्रसितं अत्यन्त भ॰
प्रसृतमासीत् तदवसितं विनष्टं तत्रत्यलोकानामप्रमुदितत्वात्
षोयनाशे अकर्म्मकत्वात् गत्यर्थाकेत्यादिना कर्त्तरि क्तः दोषो
मास्यामिति ङिः प्रसितमिति षिञ्गन्त्रबन्धे इत्यस्य रूपं किञ्च
मुदा यत् विलसितं विलासः शृङ्गारचेष्टितं स्मरेण कामेन
भासितं उद्दीपितं लसितं संश्लिष्टमासीत् तदप्यवसितमिति सम्बन्धः
लषश्लिषिक्रीडे हसितमिति पाठे विलसितमल्पीभूतं प्रमदास्त्र
स्त्रियोन समदाः न सदर्पाः यतोहतसम्मदानष्टहर्षाजाताः
षञ्जलनटइति मदेरल् यच्च पुरहितं नगरानुकूलं समीहितं
कर्त्तुमिष्टं तन्न विहितं नानुष्ठितं। चक्रवालयमकमिति मण्डला
कारेण यमकितत्वात्तथाहि सर्व्वेषां पादानां अन्त्यवर्णानां सदृ
शतया नेमिवदवस्थितत्वात् मध्यस्थवर्णस्य च विसदृशस्य नाभि
वदवस्थितत्वात्। मण्डलाकारतालक्षणं यथा पादानामवसाने
तु सर्व्वेषां तुल्यरूपता। प्रतिपादं भवेद्यच्च चक्रवालं तदुच्यत
इति ॥ ६ ॥

समिद्धशरणा दीप्ता देहे लङ्का मतेश्वरा। समिद्ध
शरणादीप्ता देहे लङ्कामतेश्वरा ॥ समुद्गयमकं ॥ ७ ॥

समिद्धेत्यादि। देहे अभ्यन्तरभागे समिद्धशरणा उज्ज्वलगृहा ज॰म॰
ततएव दीप्ता शोभावती लङ्का पुरी मतेश्वरा ज्ञातमहादेवा
तत्रान्यदेवस्य नामापि न गृह्यते समिधोदधति कृतवन्तोवेति

